# संस्कृतवार्ता:

दिनाङ्क :- 17.09.2026

प्रात: - 06:55

## प्रधानमन्त्री - सेमिकॉन इण्डिया

प्रधानमन्त्री नरेन्द्रमोदी अद्य नवदिल्ल्यां यशोभूमि इत्यत्र ऐषमः सेमिकॉन-इण्डिया इत्यस्य उद्घाटनं करिष्यति। अस्मिन् अवसरे प्रधानमन्त्री उपस्थितान् जनान् अपि सम्बोधयिष्यति। त्रिदिवसीयस्य सम्मेलनस्य प्रदर्शन्याः च आयोजनं 'सिलिकॉन टू सिस्टम्स् - बिल्डिङ्ग द इकोसिस्टम्' इत्यस्मिन् विषये भवति। अस्मिन् सम्मेलने अर्धचालक-विद्युत्प्रौद्योगिकी-मूल्यशृङ्खलया सम्बद्धाः वैश्विकाः भारतीयाश्च उद्योगाः, नीतिनिर्मातारः, निवेशकाः, अनुसन्धानकर्तारः, नवोद्यमाः, शैक्षणिकसंस्थाः छात्राश्च एकत्रिताः भविष्यन्ति। उद्घाटनात् पूर्वं प्रधानमन्त्री ह्यः नवदिल्ल्यां प्रमुखैः वैश्विक-मुख्य-कार्यपालकैः सह अर्धचालकसम्बद्धस्य विशिष्टोपवेशनस्य अध्यक्षतां कृतवान्। श्रीमोदी भारतस्य अर्धचालकक्षेत्रस्य सुदृढीकरणाय प्रशासनस्य उद्योगक्षेत्रस्य च मध्ये घनिष्ठसहकार्यस्य आवश्यकतायै बलं दत्तवान्।

## सेवा-सङ्कल्प-अभियानम्

भाजपादलं प्रधानमन्त्रिणः नरेन्द्रमोदिनः जन्मदिवसस्य उपलक्ष्ये अद्य आरभ्य मासैकपर्यन्तं राष्ट्रव्यापि-सेवा-सङ्कल्प-अभियानम् आयोजयिष्यति। अस्य अभियानस्य केन्द्रे जनसेवायां प्रधानमन्त्रिणः प्रतिबद्धतायाः प्रकाशनं तथा विशेषतः युवजनानां सेवाकार्येषु प्रवृत्त्यर्थं प्रोत्साहनं भविष्यति। अनेन अभियानेन गुजरातराज्यस्य मुख्यमन्त्रिरूपेण श्रीमोदिनः एकाधिकद्विसहस्रतमस्य वर्षस्य अक्टूबर्-मासस्य सप्तमे दिनाङ्के शपथग्रहणस्य पञ्चविंशतिवर्षपूर्तिरपि स्मरिष्यते। प्रधानमन्त्रिणः जन्मदिवसः अद्य सेवादिवसरूपेण आचरिष्यते तथा देशस्य विभिन्नेषु भागेषु रक्तदानशिबिराणि आयोजयिष्यन्ते।

अद्य सायङ्काले 'आशीर्वाद का दिया' इति कार्यक्रममपि आयोजयिष्यते। अस्मिन् कार्यक्रमे परिवाराः प्रधानमन्त्रिणः पञ्चविंशति-वर्षीयजनसेवायै कृतज्ञतां प्रकटयन्तः दीपाः प्रज्वालयिष्यन्ते।

## प्रधानमन्त्री-विश्वकर्मा - त्रिवर्षपूर्तिः

अद्य प्रधानमन्त्री-विश्वकर्मा-योजनायाः त्रिवर्षाः पूरिताः। अस्याः योजनायाः अन्तर्गतं त्रिंशल्लक्ष-लाभार्थिनां पञ्जीकरणेन महत्त्वपूर्णं सोपानम् अधिगतम् अस्ति। प्रधानमन्त्रिणा नरेन्द्रमोदिना त्रयोविंशत्यधिक-द्विसहस्रतमे वर्षे अस्याः योजनायाः शुभारम्भः कृतः आसीत्। अस्याः योजनायाः उद्देश्यम् अष्टादशसु निर्दिष्टेषु पारम्परिक-व्यवसायेषु संलग्नेभ्यः कर्मिभ्यः शिल्पकारेभ्यश्च आरम्भात् अन्तिमचरणपर्यन्तं सर्वविधसहायतां प्रदातुम् अस्ति।

## तमिलनाडुराज्ये उपनिर्वाचनम्

तमिलनाडुराज्ये मदुरान्तकम्-धारापुरम् चेत्येतयोः विधानसभा-निर्वाचनक्षेत्रयोः आयोक्ष्यमानेभ्यः उपनिर्वाचनेभ्यः अद्य नामाङ्कनपत्रप्रस्तुतेः अन्तिमः दिवसः अस्ति। मतदानम् आगामिमासस्य षष्ठे दिनाङ्के भविष्यति, मतगणना च आगामिमासस्य नवमे दिनाङ्के भविष्यति।

एते निर्वाचनक्षेत्रे ए.आई.ए.डी.एम.के.-दलस्य विधानसभासदस्ययोः मरगथम्-कुमारवेल् तथा सत्यबामा इत्यनयोः त्यागपत्रकारणेन रिक्ते अभवताम्। नामाङ्कनपत्राणां परीक्षणं श्वः भविष्यति तथा नामाङ्कनपत्राणां प्रत्याहरणस्य अन्तिमः दिवसः अस्य मासस्य एकोनविंशति-दिनाङ्कः वर्तते।

विदेशमन्त्रालयः

भारतेन स्वघोषितः पाकिस्तान-चीन-सीमासंयुक्तायोगः अस्वीकृतः। भारतस्य कथनमस्ति यत् अवैधेन बलपूर्वकेण च आधिपत्येन अधीन-भारतीय-प्रदेशसम्बद्धासु व्यवस्थासु प्रवेशाय पाकिस्तानस्य कश्चिदपि वैधानिकाधिकारः नास्ति। वार्ताहरानां प्रश्नानां प्रत्युत्तरे विदेशमन्त्रालयस्य प्रवक्ता रणधीरजायसवालः पुनरुक्तवान् यत् सम्पूर्णौ जम्मू-कश्मीर-लद्दाख-प्रदेशौ भारतस्य अभिन्नौ अविभाज्यौ च भागौ स्तः, सदैव च स्थास्यतः। भारतं पाकिस्तानम् आहूतवान् यत् एतादृशान् उपक्रमान् विहाय सः अवैधतया बलपूर्वकम् अधिगताः भारतीयप्रदेशान् अविलम्बं परित्यजेत्।

ऋतुविभागः

भारतर्तु-विभागेन अद्य बिहार-उप-हिमालयी-पश्चिमबङ्गाल-केरलम-तमिलनाडु-प्रदेशेषु पूर्वोत्तरभारतस्य केषुचित् भागेषु च प्रचण्डवृष्टिः भविष्यति इति पूर्वानुमानितम्। अद्य जम्मू-कश्मीर-हरियाणा-पञ्जाब-उत्तराखण्ड-झारखण्ड्-छत्तीसगढ-राजस्थान-गुजरात चेत्येतेषु प्रदेशेषु प्रचण्डवातेन सह विद्युद्गर्जनस्य सम्भावना अस्ति। अद्य दिल्ल्याम् आंशिकरूपेण वृष्टिः भवितुम् अर्हति।

क्रिकेट्

पुरुष-क्रिकेट्-क्रीडायाम्, अद्य सायं सार्धसप्तवादने दिल्ल्याः अरुणजेटली-क्रीडाङ्गणे शृङ्खलायाः तृतीयान्तिमायां विंशतिप्रतिविंशति-अन्ताराष्ट्रिय-क्रीडायां भारतम् अफगानिस्तान्-दलं सम्मुखीकरिष्यति।

॥ इति वार्ता:॥